तहेमाद्र्यादिमहानिबंधधृतवाक्ये स्वस्य वत्सरांतरएव विधानात्॰ तेनाचारेअतीतेक्रियमाण[illegible]माब्दिकमित्येव संज्ञा॰ तथा च वत्सरेगते मृ
तेहनीत्यादिवाक्योद्वितीयवर्षाद्यदिने विहितस्याब्दिकस्य मरणाधिकरण॰ तिथौ प्राप्तिरेव नास्तीति न तस्याद्यमासिवदेकादशेहन्युत्॰ नवा ऋषेः

क

श्राद्धकल्पद्रु

तस्यापपदेन ग्रहणं· वस्तुतस्तु मृते हनीतु कर्तव्यं प्रतिसंवत्सरं चैवमित्येव मन्वयः। प्रतिमासं तु वत्सरमित्यस्याद्यमेकादशेऽहनीत्यनेनेति
यथासंख्यन्यायेनान्वयान्न कोपि दोषः। एतेन मृते हनीत्येतदेकमेवैकवाक्यमाद्यमासिकस्योत्कर्षविधायकमाद्याब्दिकस्य तत्पदकर्षविधाय
९० कमिति परास्तं· किंच· तदेवाब्दिकश्राद्धमेकादशाहे प्रेतदेवत्यमग्रे पितृदेवत्यं पार्वणोक्तदृष्टरूपं चेति विरूपं स्यात्· अपिच· नवश्राद्धं दशा
हानि नवमिश्रं तु षड्भृतम्· अतः परं पुराणं वै त्रिविधं श्राद्धमुच्यते इति वचनात् सपिंडीकरणोत्तरं क्रियमाणे आब्दिके पुराणसंज्ञास्वैव्यव
शु हृता· एवं सपिंडीकरणोत्तरं क्रियमाणे आद्याब्दिकादिषु प्रेते पितृत्वमापन्ने सपिंडीकरणादर्वाक्तनत्वादिवाकोर्ध्वक्रियात्वव्यवहारः। तत्र
भेव तत्पक्षे नवमिश्रं पुराणमिति वैरूप्यं· मध्यमक्रियात्वमूर्ध्वक्रियात्वमिति च वैरूप्यं स्यात्· किंच· प्रत्यब्दं द्वादश तो मासिकार्था पिंडक्रियास्मृताः
क्वचित्त्रयोदशोपि स्यादाद्यमुत्सृज्य तु वत्सरमिति वाक्ये आब्दिकं प्रथमं यत्स्यात्तद्विना कातरानुराधा प्रत्यब्दं द्वादशोनीते कार्यं· मलमासे सति रामः
आद्याब्दिकं मुक्त्वा त्रयोदशोनीते कार्यं· आद्याब्दिकं तु त्रयोदशो मलमास एवेति स्पष्टमेव तस्य वर्षान्ते नुष्ठानं प्रतीयते· किंच· द्वे नाडिःपूर्ण
संवत्सरे पिंडः षोडशः परिकीर्तितः। तेनैव च सपिंडत्वं तेनैवाब्दिकमिष्यत इति वचनाद्दर्शात् सपिंडीकरणपक्षे सपिंडीकरणेनाद्या
ब्दिकस्यापि सिद्धिरुक्ता साचाद्याब्दिकस्य तत्र प्राप्तावुपपद्यते नान्यथा· निर्णयामृतकारस्तु पूर्वापरविरोधाद्धन्यदत्पंचेवत्पुरुषः। तेन मासा

दौ मासिकं कार्यमिति वचनादाद्यमासिकमेव सर्वाब्दमृततिथौ प्राप्तमेकादशेऽहन्युत्कृष्यते तत्परमेवाद्यमेकादशेऽहनीति न
च सांवत्सरिकं मरणाधिकरणतिथौ प्राप्तं· येन तस्याप्युत्कर्षविधायकमाद्यमेकादशेऽहनीति तस्यादिति यत्किंचिदेतत्· वस्तुत
स्तु· नवश्राद्धं दशाहानि नवमिश्रं तु षड्भृतमिति वचनेन नवमिश्रापरपर्यायाणां मासिकानां दशाहोत्तरमेव विधानेन मरणाधिक
रणतिथौ एकादशाह्निवा आद्यमासिकस्य प्राप्त्यभावात्तत्र तस्य विधिरपूर्वविधिरेव· एवं च मासादौ मासिकं कार्यमित्येतद्द्वितीयमासमार नू
भ्येव प्रवर्तनमित्यवधेयं· यत्तु ब्राह्मणं भोजयेदाद्ये होतव्यमनलेथवा· पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदित्यावृत्तिविधानं नदेकादशाहिकाद्य
मासिकपरं यद्वा द्वादशाहे सपिंडीकरणपक्षे षोडशानां द्विरावृत्तिसिध्यर्थमाद्यमासिकस्याद्विरावृत्तिविधानमिति· न कश्चिदनुपपत्तिः। यत्तु
न मैथिलेन हाद्यमासिकाद्याब्दिकयोः सिध्यर्थमित्युक्तं· तस्याश्राद्धहलतपनमरणयाम्नाद्धकृत्यवदिति मरणाश्राद्धवस्तुत्वपर्यं· किंच· असंक्रां
तेपि कर्तव्यमाब्दिकं प्रथमं द्विजैः। तथैव मासिकश्राद्धं सपिंडीकरणं तथेति मदनरत्नादिग्रंथधृतेवृद्धवसिष्ठवचनेन मासिकश्राद्धस्य प्रति
प्रसवेनैवाद्याब्दिकस्यापि तत्सिद्धेराब्दिकं प्रथमं द्विजैरिति व्यर्थं स्यात्· मिताक्षरापरार्कादौ त्वाद्यमित्येकोद्दिष्टोत्तरप्रकृतिपरत्वेनैव व्या
ख्यानं स्पष्टं· तेन याज्ञवल्क्यवचनस्य मिताक्षरापरार्कादिविरुद्धं· स्वकपोलकल्पितेहमाद्यादिसर्वग्रंथविरुद्धं व्याख्यानं कुर्वतः ज्ञानस्या

४०

श्राद्धकल्पद्रु एवेति विरमामः। कात्यायनेनापि सपिंडीकरणमुक्त्वा तदूर्ध्वं संवत्सरे संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादित्युक्तं तेनाब्दिकं वत्सरांते दिनी
य वर्षादिदिने कार्यं तत्र सांवत्सरिकं मतभेदेन पार्वणमेकोद्दिष्टं वा कार्यं अत एव वृद्धपराशरेण मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेहनीत्यु
क्त्वा देशधर्ममनाश्रित्य वंशधर्मं तथापरे मृत्यः श्राद्धमिच्छंति पार्वणं चक्ष्यादनात्युक्तं सपत्नीकत्वात् पुलिखोप्यनेनेति हेमाद्रिः अत्र मातामह
पर्युदासमाह कात्यायनः कर्षूसमन्वितं मुक्त्वा तथाद्यं षोडशं तथा प्रत्याब्दिकं च शेषेषु पिंडास्युः षडिति स्थितिरिति कर्षूसमन्वितं सपिं
डीकरणं आद्यश्राद्धमिति सपिंडीकरणात् श्राविति सपिंडनात् पूर्वभाविनामेकोद्दिष्टत्वेन तत्र मातामहनास्यभावात् एकोद्दिष्टमपि ये सर्व
दा क्रियते तेषामपि क्वचित्पार्वणमेवत्याह मिताक्षरायां शंखः अमावास्यां क्षयो यस्य प्रेतपक्षेथवा पुनः पार्वणं तस्य कर्तव्यं नैकोद्दि
ष्टं कदाचनेति तथा एकोद्दिष्टं यत्नेनाक्तित्रिदंडग्रहणादिह सपिंडीकरणाभावात्पार्वणं तस्य सर्वदेति प्रचेतोवचनात् सन्यासिनः रामः
क्षयाहे पार्वणमेवेति एवं संग्रामे ये मृतास्तेषामपि नैकोद्दिष्टं तथा वृद्धपाराशरः संग्रामे मस्यितानां च प्रेतपक्षे शस्त्राक्षये तेषां
पार्वणमेवोक्तं क्षयाहे पि कसमत्रमेः तथा अनाद्यगर्भजस्य भ्रातुः सर्वदा एकोद्दिष्टमेवेत्याह निर्णयसिंधौ शातातपः अनाद्यगर्भज्ये
ष्ठोपि भ्राता सर्वनिगद्यते कृते सपिंडनात्स्य नैव पार्वणमाचरेदिति आद्यगर्भज्येष्ठे तु पार्वणमेकोद्दिष्टं वा तथा पार्वणपक्षे पुत्रपितृ

व्यस्यापुत्रस्य भ्रातुर्मातामहस्य मातामहस्यापि पार्वणमेव तथा च षट्त्रिंशन्मते अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः मातामहस्य
तत्पत्न्याः श्राद्धं पार्वणवद्भवेदिति हेमाद्रिस्तु पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च मातामहस्यानुतस्य श्राद्धा दर्शपितृवद्भवेदिति जातू
कर्ण्यवचनमावश्यककत्वार्थं न तु पार्वणार्थमित्याह पितृचरणास्तु मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः तेषां तु पितृवच्छ्राद्धं कु
र्युर्दुहितृसूनव इति पुलस्त्यवचनान्मातामहस्य पार्वणमेव सापत्न्यमात्रादीनां तु पितृव्यभ्रातृमातॄणामेकोद्दिष्टं च पार्वणमिति पुलस्त्य
वचनादिकल्पे इत्याहुः वस्तुतस्तु पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं भवेत् एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणमिति हेमाद्रौ चतुर्विंश
तिमतवचनाज्ज्येष्ठानां पितृव्यादीनां पार्वणं कनिष्ठानामेकोद्दिष्टं ज्येष्ठत्वादिकं चात्रैस्वापेक्षया तथा औरसक्षेत्रजाभिन्नानां तत्र कादिद्वादशवि
२ धपुत्राणां साग्नीनां निरग्नीनां वा सर्वदा एकोद्दिष्टमेवेत्याह जातूकर्ण्यः अन्यत्वं पार्वणेनैव विधिना क्षेत्रजौरसौ कुर्यातामितरे कुर्युरेको
द्दिष्टं सुता दशेति तेन दत्तककर्तृकं सांवत्सरिकं पार्वणमिति वदंति तेष्वां नाम वदत्र कस्य पितायदि दत्तो महालये वामृतस्य दातस्य पा
र्वणमेकोद्दिष्टं वेति पितृचरणाः॥ ॥योगाक्षिः सर्वाभावे स्वपत्न्याः स्वभर्तॄणामंत्रकं सपिंडीकरणं कुर्युः स्वतः पार्वणमेवेति पत्नी
भर्तुः श्राद्धं तु पानारी मोहात्पार्वणमाचरेत् न तेन तृप्यते भर्ता कृत्वानु नरकं व्रजेदिति वचनेनत्याक्षिके एकोद्दिष्टप्राप्तं मार्यमिति प्रपितामे

श्राद्धकल्पद्रु हृच्चरणाः। साक्षान्मातुस्त्वाह कात्यायनः। प्रत्यब्दं यो यथा कुर्यात्पुत्रः पितृमृतेऽहनि। तथैव मातुः कुर्वीत पार्वणं चान्यदेवता· अन्यदेकोद्दिष्टं·
अपुत्राणां तु मित्रबंधुसपिंडकुमारब्रह्मचारिपितृष्वसृमातृष्वसादीनामेकोद्दिष्टमेवेत्याहापस्तंबः। अपुत्रा ये मृताः केचित्स्त्रियो वा पुरुषा
५२ श्च ये· तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणमिति· सिंधौ तु· मित्रबंधुसपिंडेभ्यः स्त्रीकुमारीभ्य एव च· दद्यादेमासिकं श्राद्धं सांवत्सरमतो
न्यथेति· मदनपारिजातधृतवचने अन्यपत्नेन पार्वणोक्तेः सर्वेषां क्षयाहे पार्वणमेव· एकोद्दिष्टं वा कानिनिर्णयामृतादयः पराणीत्युक्तं·
देशाचाराद्व्यवस्थेति तु युक्तं· केचित्तु· पुत्राभावे तत्पत्नी· पत्नी माता तत्पापिता· पिताभावेपि सद्विष्णुः कुर्यात्तस्यौर्ध्वदेहिकमिति· मा
र्कंडेयपुराणात्पुत्राभावे पितामह स्वार्षिकं कुर्यादित्याहुस्तन्न· पौत्रेणैकादशाहादि कर्तव्यं श्राद्धं षोडशमिति· कात्यायनेन निय
मात्· तथा च पार्वणमेकोद्दिष्टं चेति द्विविधं क्षयाहश्राद्धमिति सिद्धं· अथ क्षयाहे तिथिनिर्णयः। तत्र पार्वणमपराह्ने कार्यं· अपराह्णव्या रामः
पिनी या सा पार्वणे सा तिथिर्भवेदिति हेमाद्रौ तमाकेः। अपराह्णव्याप्तिपक्षे यथा भक्तदिनद्वये पौर्वाह्ने। दिनद्वयेपि यदा संपूर्णापराह्णव्याप्तिस्त
दा पूर्वैव तिथिर्ग्राह्या· तथा च मदनरत्ने सुमन्तुः। द्युद्वये तु व्यापिनी चेत्स्यान्मृताहस्य च या तिथिः। पूर्वस्यां निर्वपेत्पिंडानिति तां गिरसम्भाषि
तं· नारदीयेपि· दर्शे च पूर्णमासे च अपि· मार्तंडे स्त्रैव दिनं· पूर्वविद्धं प्रकुर्वाणा नरकं प्रतिपद्यते इति दिनद्वये साम्येनापराह्णैकदेशव्या

प्तिसत्वे तिथिक्षये पर्वतिथिवृद्धौ परा· तथा च बौधायनः। अपराह्णद्वयव्यापिन्यतीतस्य च या तिथिः। क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथो
त्तरेति· वृद्धिक्षययोर्वाक्योक्तेह इति निर्णयं ग्राह्या तिथिः। तस्याः क्षये दिनद्वये साम्येनापराह्णैकदेशव्याप्तौ प्रसंगाद्वा तु· तथा च माधवः। तत्र ग्राह्या
तिथिर्गौणा वृद्धिक्षयापादयेत्तथैव स्मृता विधि· अविष्म तिथिः सा प्रोक्ता पूर्वैव तिथिर्ग्राह्या दर्शे च पूर्णमासे च तिथिः पूर्वैवेति वचनात्· यत्तु· स्वर्वदर्पपितॄ
पूज्या विति वचनं· तन्मृताहातिरिक्तश्राद्धपरं· दर्शे च पौर्णमासे च तिथिरुर्वक्रिं वचनविरोधादित्युक्तं· मदनरत्ने· वैषम्ये तु कदाचित्प्रातु
पराह्णाधिकव्याप्तिः साग्राह्यादिनद्वयेपि पराह्णव्याप्त्यभावे पूर्वैव ग्राह्या· तदाह मनुः। न घटव्यापिनी चेत्स्यान्मृताहे च वयो तिथिः पू
र्वविद्धैव कर्तव्या त्रिमुहूर्ता च या भवेदिति· हेमाद्रौ नारदीयेपि· पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता· पित्र्ये स्वस्तमने वा या सा पू
र्णा निगद्यत इति· तत्रैव तिथ्यादौ तु अवघातानुरूपा वृद्धिः परेदने· नावानुग्राह्या· सपूर्वं घुर्दृष्टापि स्वकर्मणीति वचनात् पूर्वदिनेऽना
वृत्तौ सपक्षेणापराह्णव्यारंभः कार्यं इत्युक्तं· दीपिकाविवरणे पूर्वेद्युः सायं त्रिमुहूर्ता मावस्तु परेद्युः त्रिमुहूर्तानच कुह्वा परे वर्द्धनेपि हि
सेति गौभिलवचनात्। यत्तु अहः स्वमयं वेला यां कलामात्रापि या तिथिः। सैव प्रत्याब्दिकक्रियायां नापरा पुत्रहानिदेति· तत्रिमुहूर्त
स्मृतिरिति पितृचरणाः दीपिकायां तु धनिपः क्षयस्मिन्त्रिमुहूर्तन्यूनापि पूर्वैव ग्राह्या· न तु तत्रापि कुतपकालव्यापिनीत्युक्तं· यत्तु सा

श्राद्धकल्प ५ यादृक्त्रिमुहूर्तः स्यात्तत्र श्राद्धं न कारयेत् दिनिममप्येमापाहूनिषेधः सः द्वितीयदिने परान्हव्याप्तिसत्वे वेदितव्यः। तत्र श्राद्धारंभ इति पृथ्वी
एकोद्दिष्टरूपमाब्दिकं तु मध्याह्ने कार्यं मध्याह्नव्यापिनी चास्यान्मेकोद्दिष्टे तिथिर्भवेदिति मदनरत्ने वचनात् मध्याह्नश्च द्वेधा तत्र तदेकदे
शभूतो कुतपरोहिणौ मुहूर्तौ गृह्येते तथा च गौतमः। आरभ्य कुतपे श्राद्धं कुर्यादा रोहिणं बुधः। विधिज्ञो विधिमास्थाय रोहिणं तु न लंघ
येदिति रोहिणो नवमो मुहूर्तः। कुतपश्चाष्टमो मुहूर्तः आरंभस्तु कुतपप्रारंभे आवर्तनसमीपे वा कार्यः। तथा च व्यासः। कुतपप्रथ
मे भागे एकोद्दिष्टमुपक्रमेत् आवर्तनसमीपे वा तत्रैव नियतात्मवानिति अत्रापि दैधं पार्वणस्येव द्रष्टव्यं निर्णयः। ग्रहणदिने वार्षि
कप्राप्तौ भोक्तुरभावे स्वर्णस्यालाभे पितृदिनात् परस्मिन्दिने श्राद्धं कर्तव्यमित्याह गोभिलः। दर्शश्च विग्रहे पित्रोः प्रत्याब्दिकमुपस्थिते अन्नेना
संभवे हेम्ना कुर्यादामेन वा सुत इति यदा दिने विप्रबन्धादाब्दिकं न कृतं तदा तत्र त्वापि कार्यमेव तच्चनक श्राद्धं कुर्वीतार्कभोजनम्
मापनादि आपस्तंबेन गौणकालोक्तेः मृताहस्य मतिक्रम्य चूडालेषु भिजायतब्रह्मक्तेः निर्णयमिथो माधवीयेप्येवं दर्शत्वाब्दिकमतिपूर्व
माब्दिकं कृत्वा पश्चाद् दर्शश्राद्धं कुर्यादित्युक्तं प्राक् अथ भार्यारजोदर्शने तत्र क्षयाहदिने पत्न्यां रजस्वलायां सत्यां तद्दिने पाकेनैव श्राद्धं
कर्तव्यं तथा च लौगाक्षिः। पुष्पवत्स्वपि दारेषु विदेशस्थोप्यनग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित् इति मदनरत्नेम

रामः

रीचिरपि अनग्निकः प्रवासी च यस्य भार्या रजस्वला आमः श्राद्धं द्विजः कुर्यान्मृतेहनि ---- रिति मृते दन्याम श्राद्धं न कुर्यात् किंतु पा
कश्राद्धमेव कुर्यादित्यर्थः। तेनानग्निकादेरामश्राद्धविधानदर्शादिविषयं प्रयोगपारिजाते पि रजस्वलायां भार्यायां क्षयाहे यः पञ्च
जेत सर्वे नरकं यान्ति पितरः अन्नं सर्वं मधुरं हविः विदेशगो वा विगताग्निको वा रजस्वलाया मपि धर्मपत्न्याः श्राद्धं मृताहे विदधी
त पाकेनामेन हेम्ना न तु पञ्चमेह्नीति तेन तद्वचनं बलान्मृताह मतिक्रम्य चाइ हेयभिजायत इति शेषः आब्दिकन्त्वद्य एव पाकेन
कार्यं यत्तु आह्निके समनुप्राप्ते यस्य भार्या रजस्वला पञ्चमे दिने तत्कार्यं न तत्कुर्यान्मृतेहनीति मरीचिवचनं यत्तु श्राद्धीयादिनिमित्त
प्रे यस्य भार्या रजस्वला श्राद्धं तत्र न कर्तव्यं कर्तव्यं पञ्चमे दिने निरग्निकगौतमवचनं तदुभयं मपुत्रानृपुत्राया पासंप्रा प्रेन्नर्गोत्रीके
रजस्वलाभवेत्तां तु कुर्यान्नत्स्य च मेदनीति निरग्निकगौतमवाक्यं कवाकाद्धर्म तथा यस्य प्रेतस्य पत्नी पुत्रस्त्री कर्तृकश्राद्धविषयं न चैकस्य प्रेक्षा
कगौतमवाक्यस्य निर्मूलत्वमित्याशंकनीयं कालादर्शादपरार्कस्मृति लिखनात् तेनेदं वचनत्रयं स्त्रीकर्तकश्राद्धपरमेव एतेन यत्केनचिदुक्तं
नन्नं कुर्यान्मृतेहनीति मरीचिवाक्यं पित्रा द्याब्दिकपरं अपुत्रस्त्रीकगौतमीयं तु मात्राब्दिकपरमिति तदपि मानाभावादयुक्तं अयमेवार्थ
देवयाज्ञिकादिभिरपि स्पष्टीकृतः। नर्तुः श्राद्धं पञ्चमेह्नि कुर्याद्भार्या रजस्वला पुत्रपित्रोः प्रकुर्वीत मृताहनि सुधीर्यतइति कालादर्शेपि र

श्राद्धकल्पद्रु · जस्त्वांगनोनग्निर्विदेशस्थोपवाह्निके · स्वर्गादाविवनामेनतत्वेनश्राद्धमाचरेदिति · नन्वशुचित्वादेवभर्तुः श्राद्धस्य पंचमेहन्यपर्वाणि
यथोक्तानीमानिवचनानि निवाच्यं · गर्भिणी सूतिका चैव कुमारी वा च रोगिणी · यदाशुचिस्तदान्येन कारयेत्प्रयतात्स्वयमिति नृसिंहोक्तेर
५४ न्यद्वाराकरणनिवृत्त्यर्थत्वात् · तेन नरस्य मृताहातिक्रमे दोषः · अन्यथा शौचान्ते दिने श्राद्धकर्तव्यता चेदं वाक्यं वैयर्थ्यापत्तेरिति पितृ
चरणाः · यत्तु · हेमाद्रिणा श्राद्धादौ स्त्रियाम हिवाधिकाराभावात् जोऽदृष्टायामधिकारनिवृत्तेरेकभार्याणां पंचमेह्नि कार्यं · अनेकभार्या
केण तु तस्मिन्नेव दिने इत्युक्तं · पाणिग्रहणाद्धि सहत्वं कर्मस्वित्यादिवाक्यानामसाध्यपरत्वेन श्राद्धादौ सहाधिकारमानाभावात् · कृष्णं
च ज्येष्ठासत्वे कनिष्ठाया अधिकारः · ज्येष्ठया न विनेतरस्मिनिषेधात् · नच पाककर्तृकत्वेन सहाधिकारः · बाधवानाम्न पंचपाककर्तृत्व
श्रवणात् · आरब्धे तन्त्रे · पाके परं भवं वा पवैरिस्यात्तु नेपहग्वं · तेनेपत्युरागतमभार्यकर्मणि वतश्राद्धादौ न तस्याः सहाधिकार इ राम
तितया विनाप्यधिकारः · तेन पुत्रादिना मृताहे पाकेनैव श्राद्धकार्यं · वाक्यानि तु · पुष्पवत्स्वपि दारेषु · विदेशगो वा विगताग्निकं
वेत्यादिपूर्वमुक्तानि · यत्तु दारगणा पुष्पवत्वानिमित्ते सति · वाक्यानतरप्राप्तेपंचमदिनरूपे काले नैव कुर्यादित्येवमिहवाक्यमामहे
मपरिसंख्यार्थं न मृततिथिरूपकाले नियमार्थमिति कश्चिदाह · तदज्ञानकृतं · पंचमदिने श्राद्धविध्यभावेन तत्र नियमनाम

हेमाद्यप्राप्तेपरिसंख्यायोगात् · पूर्वोक्तरीत्या पुत्रकर्तृकस्य श्राद्धस्य पंचमेह्नि प्राप्त्यभावाच्च · आह्निकदिने तु पुष्पवत्वादिरूपश्राद्धविघ्न
निमित्ते तयोः प्राप्तेर्युक्तः परिसंख्या नु नित्यादिश्राद्धिककाले नियमः · अस्य स्यादोदक्षिणा निवृत्त · अत्रेहिताकृत दक्षिणानिवृत्त्यनुनिष्यादि
स्यामरूपनियम इति हेमाद्रेस्पष्टं · विदेशगो वा विगताग्निको वेत्यस्य मृताहे रजस्वलायां च भर्तव्यां मत्यां मृताहे श्राद्धमामेन हेमाद्रौ
पंचमेह्नि तु पाके विदधीतैवं कस्य विधास्वानं व्यवाहितान्वय रापापत्रेः केवलं विप्रवादैवइत्युपेक्ष्यं · तेन यस्य प्रत्नस्यत्यर्थेन पत्याएव
पंचमे ह्नि श्राद्धं · यत्तु · आपद्यनग्निरतीर्थे च प्रवासे पुत्रजन्मनि · आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे इति हेमाद्रौ कात्यायनवचन
तन्मासिकसांवत्सरिकव्यतिरिक्तविषयं · तथा च हारीतः · श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितं · अमावास्यादिनियतं माससंवत्सर
राहत इति · श्राद्धविघ्ने भार्यारजोदर्शनेसति मासिकंसांवत्सरिकं च विहाय नियतं अमावास्यादि आमेन कार्यमित्यर्थः · आमाभावे तु मा
श्राद्धं हेम्ना कार्यं · तथा च व्यासः · द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि · हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वलेति · तेन भार्यारजोदर्शने
सत्याह्निकं मासिकं चाह्निकदिन एव पाके न कार्यं · अमावास्यादिकं त्वामेन हेम्ना वा कुर्यादिति प्रांचः · पितृचरणास्तु · पाकाभावे द्विजातीनां
मामश्राद्धं विधीयत इत्यपरार्के सुमन्तूक्तेः सर्वत्र पाककर्त्रन्तरसत्वे तेन · अन्यथा · आमादिना श्राद्धविघ्ने द्विजातीनामापद्यनग्नौ तीर्थे

श्राद्धकल्प· चेत्यादिवाक्येषु आपद्विप्रादिशब्दानां पाकाद्यसंभवपरत्वेपि व्याख्यातुं शक्यत्वात्· तथा च ग्रहणादौ भोजनाभावकृतः पाकाभावः अप
त्नीकत्वरजोदोषादौ तु पाकाभावकृतः पाकाभावश्च इति सर्वथा तद्भावे आमादिश्राद्धमित्याहुः अत एवामावास्याश्राद्धप्रकरणे नोक्तं पारि
जाते स्मृत्यंतरे· मासिकान्नि सपिंडानि अमावास्या तथाब्दिकं· अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वलेति· एवं भार्यारजोदर्शने प्रतिना
गरखंडादिवचनात्· सकृन्महालयेपि यदा मृततिथ्यादरः पाकं कर्तेतरः संभवेत्तदा मृताहे च सपिंडवर्ग्यश्राद्धं महालये· आमान्नेपि न
कुर्वीत श्राद्धमामेन कर्हिचिदिति वचनात· पाके तु तस्मिन्दिने श्राद्धं कार्यं· यदा तु सर्वथा पाककर्तेतरा नावेः स्वस्य च पाकस्य भूयस्त
दा पाकाभावे द्विजातीनामिति पूर्वोक्तवचनात् तस्मिन्नेव दिने आमश्राद्धं न तु दिनांतरे एवं नित्यनैमित्तिके त्विष्टकाश्राद्धमपाश्राद्धं चेत्ते
पं॥ यदा तु सकृन्महालयादेस्तु मृततिथिनियतस्तदा दिनांतरे कार्यमित्युक्तं प्रागिति दिक्· अथ क्षयाहाज्ञाने मासाज्ञाने च तिथ्यज्ञाने
संबंधिविदेशगए काश्याश्च महालयादेस्तु मृततिथिनियतस्तदा दिनांतरे श्राद्धं कार्यं· तथा च बृहस्पतिः न ततोपि तेन मृताहश्चेत्तमाने प्रोषितेम
ति· मासश्चेन्मृति विज्ञात स्तद्दर्शे स्यात्तथाब्दिकं· मरीचिः श्राद्धविघ्ने समुत्पन्ने अविज्ञाने मृतेहनि· एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेष
इत्युक्तं इति विशेषत इति विशेषं इत्युक्तेस्तु शुक्ले का इत्यपर्यननुज्ञायते· मरणदिनज्ञाने मासाज्ञाने तु मार्गशीर्षे माघे वा तद्दिने भवेदिति· मा

सदिवसयोरज्ञाने प्रस्थानदिने मासे ज्ञेयो· तथा च बृहस्पतिः दिनमासानविज्ञाते मरणस्य यदा पुनः प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्त
यादिने पूर्वोक्तपेति अस्यार्थः प्रस्थानदिनाज्ञाने मासज्ञाने च तन्मासे संबंधिन्यामामायां कुर्यात· प्रस्थानमासाज्ञाने दिनज्ञाने तु
पूर्वोक्तमाससंबंधित दिने कुर्यादिति· प्रस्थानदिनमासाज्ञाने तु मरणवार्ताश्रवणादिमासे ग्राह्यो· तथा च भविष्योत्तरे· मृतवार्ताश्रुते
ग्राह्यो तो पूर्वोक्तक्रमेण तु· पूर्वोक्तेति वार्ताश्रवणतिथ्यज्ञाने मासज्ञाने च तद्दर्शे कुर्यात· वार्ताश्रवणमासाज्ञाने दिनज्ञाने तु पूर्वोक्तमा
ससंबंधिनि दिने कुर्यादित्यर्थः वार्ताश्रवणतिथिमासयोरज्ञाने माघस्य मार्गशीर्षस्य वा मायां कुर्यात्· तथा च प्रभासखंडे· मृतस्याहं न जानाति
मासं वापि कथं चन· तेन कार्यममावास्याश्राद्धं माघेथ मार्गके· निर्णयसिंधौ यन्मासे पन्नासि यद्दर्यात तन्मासामित दर्शः क्रिया· दिनाज्ञाने कुर्
स्तस्य आषाढस्यापि वा कुहरित्युक्तं· अन्ये तु ज्ञो पंचद्वृन्मूलपाणिः पराक्रमं यस्य तु पंचदशाव वर्षपर्यंतं वार्तानिश्चयेनेतस्य पर्वणश्रद्धादेह वा
प्रतिकृतिं दहन्नित्याव वैमासिकवार्षिकादि कार्यं· तथा च जातूकर्ण्यः पितरि प्रोषिते यस्य न वार्ता नैव चागमः ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा त
त्प्रतिरूपकं· कुर्यात्तस्य च संस्कारं यथोक्तविधिना नरः· तदादीन्येव सर्वाणि प्रेतकार्याणि संचरेदिति· यमेन तु गतस्य नभवेद्वार्ता यावद्वा
दशवत्सरान्· प्रेताव धारणं तस्य कर्तव्यमुत बांधवैरित्युक्तं· अथ श्राद्धविघ्ने निर्णयः तत्रादौ चेन्नक्षयाह श्राद्धप्रतिबंधे जाहक्तः ष्वग्रं गः दे

राम·

श्राद्धकल्प
५६

पेपितॄणां श्राद्धे तु आशौचं न प्रतेनत · आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयते · निर्णयसिंधौ त्वेवं · प्रतिमासं वत्सरश्राद्धमाशौचान्तान्न
नुयात् · मलमासेपि तत्कार्यमिति भागुरिभाषिते · अत्र आशौचान्तदिने तन्निमित्तत्वमिति पितृचरणाः · आशौचान्ते पत्न्यां रजस्वलामका या
दर्शपाते कार्यमिति केचित् · यदा तु पत्न्यां रजस्वलायां श्राद्धं न कर्तव्यमित्यादिवाक्यानां स्त्रीकर्तृकश्राद्धमात्रविषयत्वं तदा तस्यां रज
स्वलायामपाते शोषान्ते कार्यमेवेत्युक्तं · आशौचान्ते करणे तु तदनन्तरभाविन्यामेकादश्यां दर्शे वा तत्कार्यं · तथा च हेमाद्रौ षड्त्रिंशन्मते ·
एकोद्दिष्टं तु संप्राप्ते अन्तरा मृतसूतके · वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः · मरीचिः · श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेहनि · एका
दश्यां तु कर्तव्यं कृष्णपक्षे विशेषत इति · विशेषत इत्युक्तेः शुक्लैकादश्यामपि आशौचातिरिक्तविघ्नवशाद्वार्षिकातिपाते सन्निहिते द:
कृष्णशुक्लैकादश्यां दर्शे वा तत्कार्यं · पूर्वोत्तरमतयोरविचवचनादित्युक्तं · मदनरत्ने एवं · मासिकमप्याशौचान्ते कार्यं · तथा च हेमाद्रौ षड्त्रिं रामः
शन्मते · मासिके त्वाब्दिके वृद्धिः संप्राप्ते मृतसूतके · वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणा इति · यत्तु · नदरक्ष्म उषानक न चिन्मृतकादिना ·
मृतकानन्तरं कुर्यात्पुनस्तदहरेव चेत्सवितृदर्शने · यच्च · एकोद्दिष्टं तु संप्राप्ते यदि विघ्नः प्रजायते · मासमध्ये [illegible] पातस्य श्राद्धं कुर्यात्प्रयत्न

तः इति देवलवचनं · तत्तु अपमपि मासिकविषयं · पत्युर्वैकल्याभावे तेयं · वचनद्वयमपि मासिकविषयत्वेन मदनरत्ने दर्शसंग्रहे · यत्र तु श्रा
द्धं मासिकं वर्षपर्यन्तं तस्मिन्नेव तत् · तत्र हेतुरागमान्तं [illegible] वक्ष्यन्त इति · मासिकविषयकमेव वचनं · तदाशौचव्यतिरिक्तविघ्नवशादित्यपर
मित्यविरोधः · कश्चित्तु मृत्पित्राद्यपाकुर्यात्तपाकुर्यात्तन्नान्दीमिति वचनात् घटानां मासिकानां मनुष्याणां मासिकानामाब्दिकस्य चैकोद्दिष्टरूपत्वात
दैकोद्दिष्टं संप्राप्त इति पूर्वोक्तदेवलवचनान्माशौचान्ते स्मृत्यन्तरीयानुष्ठानं तेषां वार्णरूपत्वेन तु दर्शे कृष्णशुक्लैकादश्यादावित्याह तन्न · एको
द्दिष्टं तु संप्राप्ते अन्तरा मृतसूतके · वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणा इति हेमाद्रिधृतवाक्ये एकोद्दिष्टस्यापि दर्शेनुष्ठानबोधनात् ·
तेनैकोद्दिष्टपदस्यापि लक्षणत्वात् पूर्वोक्तव्यवस्था युक्ता · व्याघ्रपादिना श्राद्धविघ्ने समुत्पन्ने मृताहे आमेन श्राद्धं कार्यं · किंत्वेवैनेवामावास्या
दावाब्दिकं कुर्यादित्याह · मदनरत्ने कार्ष्णाजिनिः · आपन्नो वार्षिकं तदा कुर्यादिन्दुक्षयेपि वा · अत्रेन तदमायां तु कृष्णवा दशम्यामिति · एव
विप्रस्य निमन्त्रणोत्तरं नाशौचमिति तत्र श्राद्धविप्राणां तथा च ब्राह्मे · निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि · देहे पितृषु तिष्ठत्सु नाशौचं विद्यते
क्वचित् · कर्तुस्त्वाह विष्णुः · व्रतयज्ञविवाहेषु श्राद्धे होमे र्चने जपे · आरब्धे मृतसूतकस्याप्यारम्भात्तु तत्कुर्यादिति श्राद्धे आरम्भः पाकपरिक्रिया
रूपः · नान्दीमुखे विवाहे तु श्राद्धे पाकपरिक्रियेति वचनात् पाकस्य परिसमाप्तौ क्रियापाकप्रोक्षणमिति गौडाः · निमन्त्रणमेव प्रारम्भ इत्यन्ये · निम

श्राद्धकल्प॰ त्रणोत्तरं श्राद्धे प्रारंभः स्यादिति विश्वरूपः॥ तथा च निमंत्रणोत्तरं कर्तुर्भोक्तुश्च नाशौचं॥ यत्तु श्राद्धपाकपरिक्रियेतिनदमाश्राद्धपरमिति स्मृतितत्वाद
यः॥ हेमाद्रिस्तु॥ निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि पाकपरिक्रियेति वह्न्युपन्यासाद्यत्पाकारंभात्प्राक्॥ विप्रनिमंत्रणकृतं तदा निमं
त्रणप्रभृत्येवाशौचाभावः॥ पाकारंभोत्तरं विप्रनिमंत्रणे तु पाकारंभात्प्रभृत्याशौचं नेत्याह॥ वस्तुतस्तु॥ निमंत्रितेषु इत्यापस्तंबश्राद्धपरं॥ अन्यश्राद्धेतु
पाक एवारंभः॥ अस्मत्पितृचरणास्तु॥ यद्यपि विश्वरूपेतो पाकोत्तरमाशौचाभाव उक्तस्तथापि कर्तुरेव मतः॥ भोक्तुस्तु दोषोस्त्येव॥ अपि दातृगृहीता
श्च सूतके मृतके न च पापाः अविज्ञाते न दोषः स्यात् श्राद्धादिषु कथंचन॥ विज्ञाते भोक्तुरेव स्यात्तस्य प्रायश्चित्तादिकं क्रमादिति हेमाद्रौ ब्राह्मे॥ आदित्य
शौत्ये च॥ यस्य प्राशनोपवासादि प्रायश्चित्तमुक्तं भुक्त्वा तु ब्राह्मणोशौचे चरेत्स्नातेन दिनं इत्यादि॥ अभ्यास मन्यपक्षश्राद्धे दोहेद्रुण्यमिन्याद्यमोघ
वीयेस्माह॥ यत्तु॥ देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित्॥ तिलस्तु श्राद्धकाले न तु तदुत्तरकाले॥ नेन यहणश्राद्धादिवदोकुले दोषोस्त्येव॥ दत्कुर्वं राम॰
नेत्याहुः॥ यत्तु मिताक्षरायां सर्वथा कर्तृभोक्त्रोर्दोषाभाव उक्तः स चिंत्यः॥ अथ पाश्चात्य प्रसिद्धं सुद्धश्राद्धं दिवोदासीये॥ सपिंडीकरणाद्दूर्ध्वं
यावद्वर्षत्रयं भवेत्॥ तावद्देवनभोक्तव्यं क्षेपदनिकरा च नः॥ श्राद्धकाले त्रिकापामपि॥ प्रथमे स्त्री निमंत्र्याचा द्वितीये मांसभक्षणं॥ तृतीये रुद्धि
रंशोक्तं श्राद्धस्तुद्ध चतुर्थकमिति॥ अपमामान्यतः श्राद्धे नान्न प्रायश्चित्ते दशाकल्पः पिबेदापो गायत्र्या श्राद्धभुक्दिनेः॥ ततः संध्यामुपा

सीत जपेद्वा सुहुयादपा तिविशेषः॥ प्रायश्चित्तं तु प्रायश्चित्तकांडे वक्ष्यते॥ अथ श्राद्धसमपाते निर्णयः॥ तत्र पार्वणैकोद्दिष्टसमपाते पार्वणमादौ कु
र्यात्॥ तथा च जाबालिः॥ यदा कृत्रभदेत्याना मे कोद्दिष्टं च पार्वणं॥ पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं विधीयते॥ इति॥ यदा तु॥ पितृमातृभ्रातृव नेका
वत्सरिकाना गृहदाहादिना सन्निपातस्तत्राह॥ भृगुः॥ एककाले गतानां नां बहूनामथ वा द्वयोः॥ तंत्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक्पृथ
क्॥ पूर्व कस्य मृतस्यादौ द्वितीयस्य ततस्तुनः॥ तृतीयस्य ततः कुर्यात्सन्निपाते त्वयं क्रमः॥ पूर्व कस्य मुख्यस्य द्वितीयस्य जघन्यस्य तृतीयस्य
जघन्यस्येतरस्येत्यर्थ उक्तो मदनपारिजाते॥ ऋष्यशृंगः॥ न बुधा दिम पिंडानां पुत्राघाना गणतदः॥ संबंधासन्नमालोच्य तत्क्रमाच्छ्राद्धमाच
रेत्॥ मातापितृविषयत्वाहका मासिनि॥ पित्रोः श्राद्धतु मरणे न चेत्पूर्वं पिता पितृपूर्वं सुतः कुर्याद न्यथा मालिपोगन॥ कात्यायनः॥
देव हूनि निमित्तानि तापेरन्नेकवासरे॥ नैमित्तिकानिकार्याणि निमित्तात्यत्रनुक्रमात्॥ यत्तु॥ नेकः श्राद्धद्वयं कुर्यादिति वचनं तदेकनिमित्त
वनिमित्ते पुनः श्राद्धं न कुर्यादित्येवं परमिति मदनः॥ तेने कस्मिन्दिने कालभेदनाने केषां मरणे क्रमेण श्राद्धपाकभेदश्च॥ न पाचपृथक्चेद्वो
द्ये निर्णयसिंधौ चास्वलायनः॥ एकस्मिन्वः करन्यहि द्वयो श्राद्धयदा दिने॥ तदा पूर्वमृतस्यादौ कृत्वा स्नात्वा यथा विधिः॥ पश्चात्पुत्र
नस्य व पृथक्पाकेः समाचरेत्॥ श्राद्धपर्व विधमाने तु तत्परं ह्रिस माचरेदिति॥ यदा तु गृहदाहादिना युगपन्मृतानां मृतत्वं न दाएकेनैव पा

श्राद्धकल्प·

५८

केनाहर्दर्शेतु वर्गद्वयवत्क्रमेण श्राद्धानि पिंडाश्च· अत एव मातापित्रोरप्येकाहमृतयोः पितृपूर्वं दर्शे वर्गद्वयवदेकेनैव पाकेन श्राद्धक्रिया हु
हेमाद्रिः। पुलस्त्यः। महालये गयाश्राद्धे गतानां मृतानां क्षये हनि· तंत्रेण श्रपणं कृत्वा श्राद्धं कृत्वा पृथक् पृथक्· गारुडेपि· एकेनैव तु पाकेन श्राद्ध
हि कुरुते नहि· विकिरं नैव तत्र· कुर्यात्पिंडान्दद्यात्पृथक् पृथक् इति· केचित्तु एककाले मृतानामपि पृथक् पाकेन भिन्नं श्राद्धं मुख्यः पक्षः
पाकैकेन श्राद्धं कांत्वनुकल्प इत्याहुः· तन्न· एवं च गृहदाहादिना ऽ मरणेन पत्न्या नैकेषां युगपन्मरणं· तत्र नैवेषां कोनारायणब
लिः। तत्रोक्तानां प्रेतप्रतिमानां भेदः। बिल्वादिप्रतिमानां नाभेदः। अस्थिदाह· पर्णदाह· वा प्रत्येकं नवश्राद्ध मासिक सपिंडीकरण वार्षिका
नि तु स्वस्वकाले तंत्रेण श्रपणं कृत्वा कार्याणि· मृतानां श्राद्धानधिकारी पुत्रादिभेदे तु भेदेनैव नारायणबल्यादि श्राद्धादि निर्णीतं· अथ
न्वारोहणे निर्णयः। लौगाक्षिः। मृताहनि समासेन पिंडनिर्वपणं पृथक्· नवश्राद्धं तु दंपत्योरन्वारोहणे एव तु· मृताहे नाभिविशेषोपादानमृ
ततिथौ रेकत्वेपि दंपत्योः श्राद्धं समासेन तंत्रेण द्वयोरेकः। पिंड मृततिथिभेदे तु भिन्नः पिंडः। विशेषहेतुं वचनं· पिंडाः श्राद्धपरेत्वन्ये· अ
त्रैव मृताहनि तिथिपादेष्वमासविधानादन्यत्र तार्थमहालयमासिकसपिंडीकरणादेः पृथक् त्वप्राप्तेः नवश्राद्धमेव पृथगिति परमार्थ
यातीर्थमहालयादेः समास एव सिध्यति· अतः समासवजाद्येष्वपि पृथक् तत्वेन पत्नीमातृ· रन्वारोहणे तत्पुत्रेण विभक्तेः कनिष्ठ मन्यादन्येष्व

राम:

वसपत्न्यमातुः श्राद्धं कुर्यादिति पितृदरणा· अन्य· तिपदत्तादपि· अन्वारोहणे तु नारायणं पत्नुमुख्य का दत्त क्रियाः पिंड दान क्रियाः न कृत्वा
विकं तथा· नवश्राद्धानि सर्वाणि सपिंडीकरणं पृथक्· एकत्र तु पाकेनैव काल एव प्रदीयते सर्वदा सपिंडीकरणं पृथगन्यथा एव सर्वः। तद
पिंडं त्रिभिः संयोज्य पश्चात्तान् पिंडांस्त्रिभिः संयोजयेदिति· यत्तु एककालेन्या समारूढो दंपत्यो नियतं गतो· पृथक् श्राद्धं तयोः कुर्यादोद
नं च पृथक् पृथक्· इति गार्ग्यवचनं तत्र वृश्राद्धविषयं न च तत्र पाकाभावः। नवश्राद्धे तु पाकभेदेन पृथगिति च यदिति लिंगं न नवश्राद्धे
पोदनोक्तेः। यत्तु· या समारोहणं कुर्याद्भर्तुश्चित्तां पतिव्रता· तां मृताहनि संप्राप्ते पृथक् पिंडे नियोजयेत्· प्रत्यब्दं चन नवश्राद्धे युगपत्तम
मापयेदिति भृगुवचनं तन्मृततिथिभेदविषयमित्युक्तं प्रयोगपारिजाते· युगपद्दर्शवर्गद्वयवत्तत्रे न मृततिथिभेदे वार्षिकपिंडभेदः।
अन्यथा त्वेक इत्यन्ये· परांशर माधवस्तु· मृताहनि समासे तेन तु श्राग्निवा केसमासेन तत्तु स्वपाकादि तंत्रेकं सर्वः। नवश्राद्धं त्वा
हनं पृथक् पृथगिति वचनात् पाकभेदः। तेन नवश्राद्धं दंपत्योरिति पादपिंड निर्वपणं पृथगित्यस्य च कारेणान्यपत्रा प्यन्वपाद्यांविके
पिपिंडभेदएव· एवं च समागेहं कुर्यादिति भृगुवाक्यमप्यत्र द्विपत्नी व· तन्नुतिथि न दविषयं· किं च· पतिमरणे न तस्याः मृताप्यते
पि सहायतः पृथक् तो वा तत्कृतो म्रियेत यदि· तस्याः श्राद्धप्रदानं च पत्युरवश्यं यदनिडनिम्मृतानां तद्वचनादेकस्विन्द्युगेहरूपं सह ग

श्राद्धक. प्र. मनमेव॥ पृथक्कचित्याधिरोहणरूपस्यानुगमनस्य पृथक्चितिसमारूढस्य नविभागं तु मर्हतीत्यनेन निषिद्धत्वादित्याह॥ विप्राऽऽरोहणात्स्त्रि
यादीनां नानुगमननिषेधः॥ पृथ्वीचंद्रोदयस्तु॥ समासेन पिंडदानं लोगाक्षिवचनं चापद्विषये॥ पृथक्पिंडदानमेवमुख्यः पक्ष॥ तथाच
वृद्धपराशरः॥ भर्त्रा सह मृता या तु नारी कल्पकमभीप्सती॥ माधेश्राद्धं पृथक्पिंडं नैकत्वं तनयोः स्मृतं॥ पृथग्गेहादिकर्त्तव्यं श्राद्धमेकादशा
हिकं॥ स्यानिश्रात्वनिचात्यानि तानि कुर्यात्पृथक्पृथक्॥ अग्निस्मृतावपि॥ एकचित्यां समारूढयोर्दंपत्योर्यदि॥ पित्रोः पिंडान्पृथक्दद्
यात्पिंडत्वापत्तु न स्मृतः॥ मदनरत्नेप्रचेताः॥ एकचित्यां समारूढो म्रियते दंपती यदि॥ पृथक्श्राद्धं प्रकुर्वीत पत्युरवक्ष्ये हनि॥ मृता
नामपिसृत्या नोत्रा पर्णा पतिनासह॥ तंत्रेणश्रपणं कृत्वा श्राद्धं स्वामिक्षयेहनि॥ पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः॥ तृतीयस्य
ततः कुर्यात्सन्निपातेष्वयं क्रमात्॥ पूर्वकस्य ज्येष्ठस्य द्वितीयस्य ततः कनिष्ठस्यान्यर्थः॥ पत्नु॥ एकत्वं मागताश्चानुः पिंडगोत्रे च सूतकं॥ न रामः॥
पृथक्पिंडदानं तु न स्यात्पत्नी द्विविधेति इति॥ षट्त्रिंशन्मतेवचनं॥ न दर्शादि श्राद्धपरमित्याहुः पितृचरणाः॥ सहगमने एकेनपाकेन पिं
डद्वयं पृथक्देयमित्याहुः॥ भर्त्रा वोत्तरमन्यदिनेस्त्री मरणे सति न पक्षिणी वृद्धिः॥ नापितेन्मरणागणनया पिंडदानैकादशाहादि
कार्यं तत्पादषडशीतिमते॥ मृतं पतिमनुव्रज्य पत्नीचेदसंगता॥ न तत्र पक्षिणी कार्या पितृकार्यं वशाध्याति॥ पुत्रोन्याचाग्निदः स्यो

स्नावदेवाशुचित्वयोः॥ न वश्राद्धमपिंडत्वपुगपत्कुसमापयदिति॥ अन्यत्मपिंडानोंत्व मध्यामसहगमनं तु नमवेत्यवश्चिचिताया अंगत्वादिति
पितृचरणाः॥ विशेषो निर्णयसिंधौ ज्ञेयः॥ अथ ग्रहणश्राद्धं॥ हेमाद्रौ कश्यपः॥ चंद्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्॥ तेनैव सकला पृ
थ्वी दत्ता विप्रस्य वै करे॥ विष्णुः॥ राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं॥ मदनरत्ने॥ नक्तं तु वर्जयेच्छ्राद्धं राहोरन्यत्र दर्शनात्॥ सर्वस्वेनापि क
र्त्तव्यं श्राद्धं वै राहुदर्शने॥ अकुर्वाणस्तु नास्तिकात्पंके गौरिव सीदति॥ इत्यामन हेम्ना वा कार्यं॥ आपस्तंबः॥ चंद्रसूर्यग्रहे तथा॥ आ
मश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वेति॥ नान्नेनेत्युक्तेरिति हेमाद्रिः॥ अपरार्कस्तु॥ सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु॥ गजच्छाया
तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्॥ घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेदिति॥ वायुपुराणे पाकश्राद्धोक्तेः॥ पाकाभावे द्विजातीना
४ माममश्राद्धं विधीयत इति सुमन्तुवचनात्॥ पाकाभावे आमेन श्राद्धमित्याह॥ मिताक्षरा पार्थमीपि॥ ग्रहणश्राद्धभोक्तुर्दोषो हानुक्तस्मृत्यु
ति॥ इदं तु षट्दैवतं कार्यं॥ आमश्राद्धं विकृतिवान्दृश्येत्॥ प्रयोगपारिजाते अन्वष्टकासु वृद्धौ च गयायां च मृताहनि॥ चंद्रसूर्योप
रागे च व्यतीपाते मृतेहनि॥ मातृश्राद्धं पृथक्कुर्यादन्यत्र पतिना सहेति॥ भवदेवस्त्वमुक्तेः॥ इदं तु सूतकेपि कार्यं॥ सर्ववर्णा सूतके पि मृत
के राहुदर्शने॥ स्नात्वा श्राद्धं प्रकुर्वीत दानं शतसहस्रविवर्जितमिति॥ कालादर्शे अंगिरावचनात्॥ इत्यन्यत्र विस्तरः॥ अथ श्राद्धोगतर्पणं॥ न

श्राद्धकल्पत
४०

द्वामावास्याश्राद्धपूर्वं कार्यं पूर्वं तिलोदकं दत्वा आमश्राद्धं तु कारयेत् इति पृथ्वीचन्द्रोदये गर्ग्योक्तेः तथा चामश्राद्धे पाकारंभात्प्रागेव वा
निमंत्रणोत्तरं वा यद्वा नित्यतर्पणं क्रियते तदा तेनैव श्राद्धांगतर्पणस्य प्रसंगेन तंत्रेण वा सिद्धिः ततः पूर्वं नित्यतर्पणकरणे तु श्राद्धांगतर्पण
पाकाद्यारंभोत्तरं निमंत्रणोत्तरं कार्यमिति पितृचरणाः प्रसंगेन नवस्पृष्टं परेद्युरिति तिलोदकमिति क्वचित् परेद्युरन्यत्र तिलोदकं स्मृत्यंतरे पितृत्वं श्रा
गं जलं दद्यात् निषिद्धेपि परेद्युः न वर्गेकस्यचन येषामन्येषां तु विवर्जयेदिति तेनेदं प्रत्यहं देवतानां संस्कारक दर्शश्राद्धं तु परेद्युरेव घृक्षमो
णदेवतानां तासंस्कारकमिदं तेन नित्यतर्पणमपि परेद्युः कार्यं तत्पापान्नं तथा च वार्षिकादिने स्वपितृतर्पणं नैव कार्यमेव तत्र नित्यतर्पणं स
प्रम्यां भानुवारे च माता पित्रोर्मृतेदिने तिलैस्तर्पणं कं कुर्यात् स भवेत्पितृघातकः निवद्ध नाहार्षिकादिने तिलरहितं कार्यं दक्षः स्पेष्ठ तातृ
पितृ स्पेष्ठ पत्नी मातरस्तथा एतेषां तु मृताहे तु परेद्युस्तिलोदकं अत्र मूलं मृग्यं यत्र उपरागेपि तु श्राद्धपाते मातापित्रोर्मृतके निषिद्धेपि दर्श
त्रतिलैस्तर्पणमाचरेदिति कात्यायनवचनं तत्र श्राद्धकल्पस्य तत्सुमानापिंडतर्पणादि विषयं श्राद्धांगतर्पणविषयं वेति निर्णयसिंधौ पक्षद्वयमु राम:
क्तं तथा पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकं श्राद्धं तु रश्मितर्पणं महत्सु दाने च सपादं एकामं नव एव हि अष्टकास्विति पूर्वं पुत्राद्धं त्व
ष्टकाश्राद्धं तान एव तर्पणं एवं माघ्यावर्षश्राद्धस्याष्टकाश्राद्धविकृतित्वात् इत्येतत् सिंधौ कपिलः मन्वादिषु युगाद्यासु दर्शे च क्रमणे च

पौर्णमास्यां व्यतीपाते दद्यात्पूर्वं तिलोदकं अर्धोदये गजच्छाये ग्रहेषु च महालये मृगण्यां च मघाश्राद्धे दत्वेति तर्पणं विदुः कारुण्यश्राद्धविष
येसद्योदद्यात्तिलोदकमिति हेमाद्रौ चावश्यकं तथा च वृद्धत्रारद्युः परेद्युः श्राद्धकृत्स्यापि नतर्पयेत्पितॄन् तन्मते पितरः क्षुधार्ताः पददत्वाव्र
तिष्ठति हृदि श्राद्धांगतर्पणस्यापवादः उक्तो वृद्धत्रारद्ये मिथ्याच वृद्धिश्राद्धमपि न च प्रेतश्राद्धं तु मासिके संवत्सरविमोकचनकुर्या
त्तिलतर्पणमिति अत्रविशेषः संग्रहेपि स्नात्वा तीर्थं समागत्य उपविश्य कुशासने संतर्पयेत्पितॄन् तदा बद्ध्वात्वा सर्वं च धारयेत् अत्रापि
स्नात्वेत्यंत्रकस्नानपरं द्वितीयं तु नित्यस्नानपरं तेनाद्य त्रलानस्नात्वा कुशाः पवित्रपश्राद्धांगतर्पणं कृत्वा तत्र नित्यस्नानं कृत्वा
पश्चाद्वस्त्रधारणं कुर्यादित्यर्थः तेनेदं वचनं वचनबलात् संध्यामहत्वेव कार्यं शिष्टाचारोप्येवं परंतु नैतत्तर्पणं स्नानं संध्याविनानत्वानधि
कारात् नच तर्पणपदं श्राद्धप्रयोगानुवृत्त्या कर्ममध्ये संध्याया विच्छेदः इति वाच्यं तथात्वे श्राद्धदिने सायंसंध्यानुष्ठानापत्तेरित्याह स
वदयं स्नात्वेत्यपदस्य न शिष्टसंप्रदायं चाननुपेक्ष्य अत्र वस्त्राद्रिकतपिनाजेया वक्ष्यमाणे इति मुनात् श्राद्धं तर्पयेद्धिजानिति
स्मृत्यर्थसारोक्तेः तथा अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले नामगोत्रस्वधाकारैर्द्वितीयां तेन तर्पयेदिति तेनेदं नित्यतर्पणवि
कृतिः तेन यथा वैधातव्याद्दीक्षणीयाश्वमेधांगभूताद्दीक्षणीयायास्तिष्टमांगदीक्षणीया विकृतिरेवं श्राद्धांगतर्पणं विकृतिरिति ध्येयं क

५९

श्राद्धकल्पद्रु· ष्यतः कृते मादिमहर्नरवनादौ तु श्राद्धांगं तर्पणं न घृतं· अथ वृद्धिश्राद्धं· आश्वलायनगृह्यकारिकायां· स्यादाभ्युदयिकं श्राद्धं वृद्धिपूर्वेषु कर्म
सु· पुंसवनं च सीमंते चौलोपनयने षित· विवाहे चानलाधेयप्रभृति श्रौतकर्मसु· इदं श्राद्धं प्रकुर्वीत द्विजो वृद्धिनिमित्तकं· अन्येषां षोडश
संस्काराणां श्रावण्यादि श्रपाष्यते· वाप्यादौ यापना दौ तु कुर्यु· पूर्तनिमित्तकं· ब्राह्मेपि· वेदव्रतेषु चाधानपत्नुः सवनेषु च· नवान्नभोजने स्नाने ७
याः प्रथमर्तवे· देवरामनडागादि प्रतिष्ठासु उत्सवेषु च· राजाभिषेके बालान्नभोजने वृद्धि संज्ञकान्· वनस्थाश्च संगच्छन्पूर्वेद्युः सद्य एव वा·
पितॄन्पूर्वोक्तविधिना तर्पयेत्क मसिद्धय इति· एवं च· नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमारभेदिति· शातातपवाक्यं च श्रोतपूर्वोक्त
वाक्ये नांदीश्राद्धमुक्तं· तत्र वपनमुक्तिविवाहादि प्रकरणाधीवकौ· सामदग्ध्यस्य वा पसंहार इति ध्येयं· अतो नमध्यावंदनादौ तदपेक्षितः
आश्वलायनः अष्टकासु भवेच्छ्राद्धं नश्राद्धे श्राद्धमिष्यते· नस्रोष्यंतिजातकर्मप्रोषितागतकर्मस्विति छंदोगपरिशिष्टवचनेमातृकर्म राम:
व्यतिरिक्तेषु चतुर्दशी पुनांदीश्राद्धनिषेधो नान्तरिक्ष इति वन्नित्यानुवादः प्राप्त्यभावात्· सोष्यंत्यामासन्नप्रसवतस्याः पुंसवप्रसवार्थक
र्म· तथा प्रोषितेनागते कर्म· अस्मिंश्च छंदोगपरिशिष्ट वचने जातकर्मण्येवं नांदीश्राद्धनिषेधः पुत्रजनननैमित्तिके नैमित्तिकं तत्कार्यमेव
जन्मन्युपोपनयने विवाहे पुत्रकस्येति वचनात् मिमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयात्मकं· पुत्रजन्मनि तत्कार्यं जातकर्मसमन्व

येति मार्कंडेयपुराणवचने· नैमित्तिकमसग्रहाभ्यां श्राद्धस्य जातकर्मानुत्पत्त्वावगमेनांगत्वायोगात्· तेनेदं पुत्रजनननैमित्तिकमेव अन्ये
षु तु कर्मस्वंगमिति कश्चित्तन्न· पूर्वोक्तवचनद्वयस्यच्छंदोगपरत्वात्· अन्यथा जातकर्मणः षोडशसंस्कारांतर्गतत्वादन्येषां षोडशसंस्कार
श्रावण्यादिष्वपि स्यात् इत्यादि विरोधापत्तेः एवं च वृद्धिश्राद्धं तु कर्तव्यं जातकर्मादिके पुत्रविवाहेनंतं गुणसंदिग्धानवं द्वाहिः प्रमाणाभावात्
वस्तुतस्तु जन्मप्रयोपनयनइत्यादि वाक्ये पुत्रजन्मशब्देन लक्षणया जातकर्मैवोच्यते· अन्यथाभिमताप्रयने चैव पुत्रादिमुखदर्शनदनिवा
कोवोदायाः प्रथमार्तव इविवाकार्य· पुत्रमुखदर्शनस्यापि स्वातंत्र्येण निमित्तबापत्तेरिति पक्षं किंचिदेतत्· कश्चित्र प्रधानादृत्त्वा वाप्रसंगभूत
स्य श्राद्धस्य नावृत्तिरित्याह· कात्यायनः असकृद्यानि कर्माणि क्रियेरन्कर्मकारिणः प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च· तेन श्रवणाकर्मा
श्वयुजीकर्मादिसंस्थास्वपि प्रतियोगं न वश्राद्धं कृत्वापवित्रति संस्कारकांडे वक्ष्यते तथा स एव· आधाने होमयोश्चैव वैश्वदेवे तथैव च· बलिक
र्मणि दर्शे च पूर्णमासे तथैव च· नवयज्ञे च यज्ञज्ञा वदंत्येवं मनीषिणः एकमेव भवेच्छ्राद्धमेतेषु नपृथक् पृथक्· एवं च नैवं च प्रतियोगमा
वृत्तिः एतनांदीनेषु तु चातुर्मास्यज्योतिष्टोमादौ प्रतिप्रयोगमावृत्तिर्भवत्येवेति सिद्धम्· तथा एकस्यात्रिवारनेकेषां नामकरणादीनां सं
स्काराणां करणे एकमेव श्राद्धं तदुक्तं छंदोगपरिशिष्टे· गणशः क्रियमाणानां मातृभ्यः पूजनं सकृत्· सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु·

श्राद्धकल्पद्रु मातृभ्य इति बह्वृचपरिशिष्टे चतुर्थी· एवमनेकापत्यानामभिन्नमातृजानां युगपत्संस्कारकरणेऽपि· पृथक्मातृजयोः कार्यो विवाहस्त्वेकवासरे· ए
कस्मिन्मंडपे कार्यः पृथग्वैदिकयोरूर्ध्वमिति मेधातिथिना एकदिने विवाहे विहितत्वात्तत्राप्येकमेव श्राद्धं· देशकालकर्त्रैक्यादिति पितृचरणाः
६२ एवं यमयोः संस्कारेष्वपि तिक्ष्णिन्तु· योगसिद्धिकरणन्यायेनैकया सामग्र्या एकमेव कार्यं· अन्यत्र· एवं च संस्कार्यभिन्नानामुपनयनविवा
हादिजन्यापूर्वाणां साङ्गत्वार्थं पृथगेव नान्दीश्राद्धमित्यादि तुच्छं· नयगमिति चावर्तनीयं· तथात्वे प्रयाजादीनामपि प्रतिप्रधानमावृत्त्यापत्तेः· अ
गृह्यमाणविशेषत्वात्तत्रत्वं तु तदुद्देश्यताप्यविशिष्टं· तेनयथानेकयूपस्थलेऽप्युद्देश्यप्राप्तः· सत्रे तिकुद्देशप्राप्त इति बुद्धिर्नवर्ततेन तत्र क्रियमाणाप्
वाङ्नियतिरगृह्यमाणविषयत्वात्तत्र तथात्रापि· एकमातृजानामेकत्वे कस्यचिदिवसे संस्कारैकवसे संस्कारकरणे एकस्योपनयनादेरसमाप्त्या
परस्य विवाहादि कर्तव्यमित्यादि संस्कारकांडे वक्ष्यते· यदा तु· पित्रभावे पितामहादिः कन्यादानादिकं तेनित्तदोषः स्वपितृभ्यो देयान् स्व रामः
पितृभ्यः सुतां दद्यात्सुतसंस्कारकर्मसु· पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमादिति कात्यायनोक्तेः· अत्र स्वपितृभ्योऽत्यस्य तस्याभावे तु
तत्क्रमादित्यत्राप्यनुषंगः· तथा चायमर्थः· तस्य पितुरभावे तत्क्रमात् पित्राय यास्वपित्रादिभ्यो दत्त्वा मासीन्तेनैव क्रमेण पितामहादिपि स्वपित्रा
दिभ्यो दद्यादित्याशार्कः· तत्क्रमात् संस्कार्यपितृक्रमादिति हेमाद्रिः· पूर्वमेवानुपपन्नं· अधिकारबोधकवाक्यानुपपत्त्या स्तु मातुलादयः संस्का

र्यपितृभ्य एव दद्युः· तथा च कात्यायनः· अनग्निकोऽपि कुर्वीत जन्मादानादिकर्मणि· पित्र्य एव पिता दद्यात्तानेवान्द्ध उपनर्पयेदिति अत्र कुमा
ग्निनिरग्निर्वा हि वैश्वदेवं कुर्यात्· तथा चाशौचकाश्वलायनपरिशिष्टे· आहारवृद्धिस्वपचात् दर्शनधुनहालये· एकोद्दिष्टेनुनिवर्त्यं वैश्वदेवावि
धीयन इति· यत्तु हेमाद्रौ· शेषमन्त्रमनुज्ञाप्य वैश्वदेवक्रियातनः· श्राद्धे वृद्धिश्राद्धशेषण वैश्वदेवसमाचरेदिति· बतुर्वर्गचिन्तामणौ दिनादौ
श्राद्धप्यंते वैश्वदेव उक्तः· सपाकश्राद्धपरः· शेषमन्त्रमनुज्ञाप्युक्तेः· तदभावेत्वामदेमसंकल्पश्राद्धादौ तावदेव वैश्वदेवः· अत्र सर्वोऽपि वि
शेषः· संस्कारकांडे वक्ष्यतइतिदिक्· इति वृद्धिश्राद्धं· अथ प्रेतश्राद्धानि· तत्रादौ नवश्राद्धानि· तथाश्वलायनानामयमेतृतीयपंचमसप्त
मेनवमेत्येवं पंच नवश्राद्धानि· नवश्राद्धदशाहानीति नारायणवृत्तौ वचनात्· प्रथमद्वितृतीयेद्विपंचमसप्तनवस्विपि· दाशोपिंडोमहानवैर्वै
शेषेप्येकं तु विन्यसेदिति नारायणमिश्रवचनात्तराश्च द्वादि... नवश्राद्धेवपवपिंडश्चैकुऽन्यपर्यः· आश्वलायनानामपि· यदानवमदिने संभव
त्यहानेरेकादशेऽह्नितत्कुर्युः· तथा चबौधायनः· मरणादिषमेषु दिनेषु केकेन वश्राद्धं कुर्यादानवमात्· यदिनवृत्तिपूर्णतेकादशेऽह्नि तत्कुर्या
दिति· अन्येषां तु षट्· तथा चांगिरसः· प्रथमेऽह्नि तृतीयेच पंचमसप्तमेतथा· नवमैकादशेचैव नवश्राद्धमुच्यत इति· हमाद्रौनागरखंडे तु त्रीणि
संचयनस्यार्थेनानि वैश्वणुसांप्रतं· यत्रस्थानेभवन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत्· एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः· ततः संचयनस्थाने

६१

श्राद्धकल्प· तृतीयं श्राद्धमिष्यते इति श्राद्धत्रयमुक्त्वा· पंचमे सप्तमेनवदष्टमे नवमे तथा· दशमे कादशे चैव नवश्राद्धानि तानि चेति नवसंख्याकानि श्राद्धा
नीत्युक्तं· नवश्राद्धं तु तत्प्रोक्तं एवमेकादशे दिने तत्र विवचनादेकमेव तदीत्यपाति वाजपेययाजिनः आद्यश्राद्धमशुद्धेपि स्यादिनायादिहित
माद्यं तदपि नवमितिकल्पकांडे हेमाद्रिः तेनात्र शाखाभेदाद्व्यवस्था· सर्वस्य ष्टमाह· मदनरत्ने शिवस्वामीः नवश्राद्धानि पंचाहुराश्वलाय
नशाखिनः आपस्तंबा षडित्याहुर्विभाषा त्वितरे सुहीति· अत्र च युग्मा विप्राः युग्मांश्च भोजयेद्विप्रान्नवश्राद्धं च नवमे वद्धितिहेमाद्रौ वचना
त्· शूलपाणौ तु अयुग्मान्भोजयेद्विप्रान्नवश्राद्धे तु तन्नवेदित्युक्तं· हेमाद्रौ स्मृत्यंतरे· आशिषो द्विगुणा दर्भा जपाशीः स्वस्तिवाचनं· पितृश
ब्दश्च संबंधश्च नामैवाहूस्तथैव च· पात्रालंभो वगाहश्च उल्मुकोलेखनादिकं· तृप्तिप्रश्नश्च विकिरं शेषप्रश्नस्तथैव च· प्रदक्षिणाविसर्गश्च सीमान
गमनं तथा· अष्टादशपदार्थास्तु प्रेतश्राद्धे विवर्जयेत्· परिशिष्टे· अनुदकमधूपं च गंधमाल्यविवर्जितं· नवश्राद्धममंत्रं च पिंडोदकविवर्जितं· राम:
पिंडोदकमवनेजनं· स्मृत्यर्थसारे तु· धूपदीपादिदानं कृता कृतमित्युक्तं· कृष्ण: नवश्राद्धं मासिकं च यद्यदूनं तिरंभवेत्· तत्तदुत्तरसात्
रनुष्ठेयं प्रवर्त्तनदिति· प्रेतश्राद्धं पूर्वेद्युर्दिने विप्रनिमंत्रणं कार्यमित्युक्तं· स्मृत्यर्थसारे· अथात्र सगोत्रस्य संचयनमुच्यते· संवर्तः प्रथमे
ह्नि तृतीये वा सप्तमे नवमे तथा· अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह· विष्णुः चतुर्थे दिवसेस्थिसंचयनमिति· तथा· संचयनश्राद्धे वि

५ शेषमाह बृहस्पतिः चतुर्थे हनि विप्रेभ्यो देयमन्नं द्विबांधवैः गावः सुवर्णं वित्तं च प्रेतस्याशौचिनंतु यद्दति· अथात्रैव प्रसंगाद्दशपिंडा उच्यंते
ब्राह्मे· शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रियते सदा· द्वितीयेन तु कर्णाक्षीनासिकाश्च समासतः गलांसभुजवक्षांसि तृतीयेन यथाक्रमं· चतुर्थेन
तु पिंडेन नाभिलिंगगुदानि च· जानुजंघे तथा पादौ पंचमेन तु सर्वदा· सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः दंतलोमान्यष्टमेन वीर्यं तु नवमेन
तु· दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः इति· याज्ञवल्क्योन तु पिंडयज्ञावृतादेयं प्रेताय त्रिदिनं त्रयमुक्तं· तेनात्र फलनारतम्यं ज्ञेयमिति निबं
धानेषु गारुडे तु· एकादशाहं दशगात्रविश्लेषितो दविनो कोष्टमगन्वामीदेवानां पिंडः षडसंख्यया नवा इति· षट्पिंडा अधिकाः काश्य
पाः शोचे दश पिंडास्तु प्रथमे दिवसे त्रयः· द्वितीये चतुरः तृतीये त्रयः पंचस्वेवं तु यो· अथ दनवश्राद्धानि तु प्रथमे एकं तृतीये च· प्राप्तकालत्वात्
कृत्वा· सर्वाण्याहुरेकादशे तु सहकार्याणि पद्धतिषु प्रथमेत्र कृतानंतरानवश्राद्धमासिकं चेति पूर्वोक्तवचनात् तृतीयेनेव सर्वाणि कार्या
णि यत्तु· ज्युदाशौचेन वश्राद्धं वृषोत्सर्गं चतुर्थेह्नि समाचरेदिति केन चिल्लिखितं तन्नवचनं तन्मदनानि बंधेषु काप्यनुपलंभात्तन्मूलं· समूलत्वे तु
कालहेमाद्रौ आद्यश्राद्धस्यापि नवश्राद्धत्वाभिधानात् इतिमप्रायमिति ध्येयं· हेमाद्रौ भविष्ये· नवश्राद्धानि सर्वाणि न कृतानि तु यस्य वै ना
धिकारी भवेत्तत्र मासिषाण्मासिकाब्दिके· तथा· अनब्धान्तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते· तथा· यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश·

पित्राचैवस्थिरंतस्य दद्याश्राद्धरूपीतिनेनतन्नद्वचनेबलात् नवश्राद्धषोडशश्राद्धवृषोत्सर्गसपिंडीकरणत्रेनस्त्रीणांजनपर्वनश्राद्धनात्पा
निविजानीयान्येवप्रेतत्वानीतिनषोडशश्राद्धमात्रेणनवासपिंडीकरणमात्रेणान्येषामन्यथाऽसिद्धिरितिध्येयं· नवश्राद्धानंतरंक्रियमा
णानिमासिकानिनवमिश्राणिनवमिश्रंतुषड्तूनित्याश्वलायनवचनात्· वर्षपर्यंतमित्यर्थः·मासिकान्याहमदनरत्नेजातूकर्ण्यः·द्वा
दशप्रतिमास्यानिआद्यषाण्मासिकेतथा· त्रैपक्षिकाब्दिकेचेतिश्राद्धान्येतानिषोडशेतिद्वादशप्रतिमास्यानिआद्यषाण्मासिकाब्दिके·स
पिंडीकरणंचैवइत्येतेश्राद्धषोडशमितिपाठः·अत्राद्यपदेनऊनमासिकपरमितिकेचित्· अन्येतुमदनरत्नकौस्तुभपरमित्याहुः·ऊनषाण्मासिका
ब्दिकंराद्वावूनषाण्मासिकोनाब्दिकपरौ·गौडास्तु·अत्रमदनकौस्तुभमासिकापेक्षयाद्वितीयमिव·तथाचद्वादशमासिकानिमदनकौस्तुभंऊन
षाण्मासिकंत्रैपक्षिकमूनाब्दिकमित्येवंषोडशश्राद्धानिजातूकर्ण्यः·द्वादशप्रतिमास्यानिआद्यषाण्मासिकेतथा·त्रैपक्षिकाब्दिकेचेतिश्रा
द्धान्येतानिषोडश·अत्रषाण्मासिकाब्दिकशब्दावूनषाण्मासिकोनाब्दिकपरौ एतन्मतेत्वपत्नीवनेनमासिकं· एवंचैतन्मतेमासादौमासि
कंकार्यमित्युनिर्मूलत्वात्सर्वाणिमासिकानिमासांतएवकार्याणि यद्वाप्रतिमासंतुवत्सरमितियाज्ञवल्क्यवचनेनतथाचनवमिश्रंतुष
ड्तूनितिवचनेवात्यंतसंयोगेद्वितीयास्वर्गेणनद्ददुनामासिकस्यवर्षभावावश्यकत्वात् नैकवाक्यतालाभाय मासादौमासिकमित्यत
त

द्वादशमासिकमात्रपरं· एकंचमासादौमासिककार्यमित्यनेनद्वादशमासिकस्याद्याब्दिकस्याद्यश्राद्धस्यचकाला· क्रमेणैवोच्यते·अत
एवमृतेहनीतुकर्तव्यमितियाज्ञवल्क्यवचनेनमासिकानामावत्सरिकस्यचकालाः उक्ताः·आद्यस्यकालाःपृथगेवोक्तइत्याहुः·मा
सिकानांकालमाहयाज्ञवल्क्यः·मृतेहनितुकर्तव्यंप्रतिमासंतुवत्सरं·प्रतिसंवत्सरंचैवआद्यमेकादशेहनि·अत्राद्यशब्देनाद्यमा
सिकमेवोच्यते·नत्वाद्याब्दिकमित्याद्दिक्षपादप्रकरणप्राकर्तपंक्तिनां·यत्तुब्राह्मणंभोजयेदाद्यहोतव्यमनलेपवा·पुनश्चभोज
येद्विप्रंद्विरावृत्तिर्भवेदिति·गोभिलोपतदेकादशाहिकापरं [illegible] तथाचैकादशाहश्राद्धद्वयं·एकादशाहेश्राद्धमाद्यमासिकंचेति
चित्·मदनपारिजातेत्वाद्यमासिकस्यैववाचनिकं [illegible] एकादशाहे [illegible] मासिकं [illegible] इत्युक्तं·कालादर्शेतु·द्वा
दशाहेसपिंडीकरणपक्षेषोडशानां [illegible] मासिकस्याप्रवृत्ति [illegible] इत्युक्तं·एवंच [illegible] इत्युक्तं·न
स्यतत्रमासप्रभावादित्युक्तंप्राक्· [illegible] एकादशाहे [illegible] मासिके [illegible] पाक
द्धश्राद्धमपिभोजनेप्रेतोद्दिश्यएकादशाहे [illegible] इत्युक्तं·एकादशाहश्राद्धकालोपि [illegible] इत्युक्तं·कोर्म·एकादशाहेकु
र्वीतप्रेतमुद्दिश्यभावतः·एकादशेतुविप्रंतुप्रेतमावाह्यभोजयेत्·द्वादशवाब्दिकं [illegible] एकादशाहं [illegible] एकादशाहेवि

श्राद्धकल्प पुत्रस्यैतद् गुणश्राद्धपरमित्युक्तं · केमकेषा · एकोद्दिष्टं च एव स्याद् द्वादशेऽहनि वा पुनः · अशक्तः प्रथमे पक्षे कुर्वीतेदं मुदाहृतः । अर्धमासे पदामासिक
तो संवत्सरे पितेति · यत्तु नवश्राद्धमासिकं च यद्परं तदिति नवदेहिन्यादि नवाद्यमासिकातिरिक्तपरं · तत्र विशेषकाजन्यो गतवान् · तथा सपिण्ड्यादि
जिरण्येन तदाद्यं श्राद्धमेकादशेऽह्नि कार्यं · तथा चे पैठीनसिः एकादशेऽह्नि यत् श्राद्धं तत्सामान्यमुदाहृतं · चतुर्वर्णमिवर्णानां सूतकं तु पृथक्पृथ
क् · तथा · आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि · कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः इति · एवमन्यमपि ऽशौचेऽपि · प्रदेनरत्नेऽपरवः स
ह · शौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि · उशनाः · आद्यमशौचेऽपि दातव्यमाद्यमेकादशेऽहनि · इमतीतविषयेऽस्य दोषं वा तद्विषयत्वमिति तेन
द्वादशवर्षादिषु तीक्षोत्तरं पर्णशरदाहे ह्यदोषं मप्येकादशाहः · तेन कुर्यादेकादशेऽहनीति पैठीनसिवाक्यमशौचोत्तरदिनोपलक्षणं परा
